# शब्दविमर्शः (क्त्रिप्रत्ययान्तशब्दानामवलोकनम्।)

डा. वि.आर्.मनोज् - ऐ. ऐ. टि. काण्पुर

## **कृत्रिमम्।**

भट्टिकाव्यस्य षष्ठे सर्गे बालिवधप्रसङ्गे बहूपायसम्पन्नम् अग्रजं जेतुं अपि सामर्थ्यमिति सुग्रीवो रामं पप्रच्छ -

शत्रुघ्नान्युधि हस्तिघ्नो गिरीन् क्षिप्यन्नकृत्रिमान्।

शिल्पिभिः पाणिघैः क्रुद्धस्त्वया जय्योऽभ्युपायवान्।। इति। (**6.114.**भट्टिकाव्यम्।)

हे राम युद्धे गजवधसमर्थः शत्रुघ्नान् अमानुषनिर्मितान् पर्वतान् उत्साहार्थं पाणिवाद्यं कुर्वद्भिः युद्धकुशलैः सह क्षिप्यन् बहुसाधनसम्पन्नः कुपितो बाली भवता किं जेतुं शक्यः ? इति भावार्थः। अत्र अकृत्रिमान् गिरीन् इत्यस्य स्वाभाविकान् (अमानुषनिर्मितानित्यर्थः) पर्वतान् इत्यर्थः। 'डुकृञ् करणे' *(तना.१४७३)* इत्यस्माद्धातोः "ड्वितः क्त्रिः" *(३.३.८८)* इति सूत्रेण क्त्रिप्रत्ययो विधीयते। तदन्तात् "त्रेर्मम्नित्यम्" *(४.४.२०)* इति सूत्रेण तद्धितो मप् प्रत्ययो भवति।

शिशुपालवधस्य द्वितीये सर्गे उद्धवबलदेवश्रीकृष्णानां मन्त्रवर्णनं प्रस्तुतम्। तत्र ननु क्षुद्रोऽयं चैद्यः किं न करिष्यतीत्याशङ्क्य तस्य बलवत्तां वक्तुं मित्रामित्रबलाबलविवेकं तावत्करोति बलरामः

सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्यतः।

स्याताममित्रौ मित्रे च सहजप्राकृतावपि।। इति। (**2.36.**शिशुपालवधम्।)

क्रियया उपकारापकारान्यतररूपया निर्वृत्तः कृत्रिमः। प्राग्वत् 'ड्वितः क्त्रिः' 'त्रेर्मम्नित्यम्'। सखा सुहृत् शत्रुश्च कृत्रिमो गरीयान्। यस्मात्तौ कृत्रिममित्रशत्रू कार्यत उपकारापकारकार्यवशात्। निर्वृत्ताविति शेषः। उक्तकार्योपाधेर्यावज्जीवमनपायादनयोर्मित्रामित्रभावोऽप्यनपायीति गरीयॅस्त्वमिति

भावः। सहजप्राकृतौ तु नैवमित्याह स्यातामिति। सह जातः सहजः। तत्र सहजं मित्रं मातृष्वसेयपितृष्वसेयादि। सहजशत्रुस्तु पितृव्यतत्पुत्रादिः। प्रकृत्या सिद्धः प्राकृतः। पूर्वोक्तसहजकृत्रिमलक्षणरहित इत्यर्थः। तत्र विषयान्तरः प्राकृतः शत्रुः। तदनन्तरः प्राकृतं मित्रम्। तौ सहजप्राकृतौ शत्रुमित्रे च स्यातां तावात्मकार्यवशादनियमेनोभयरूपतामपद्येते न कृत्रिमशत्रुमित्रे। कृत्रिमः शत्रुः शत्रुरेव मित्रञ्च मित्रमेवेति कृत्रिमावेव मित्रामित्रे गरीयांसौ। न तु सहजौ नापि प्राकृतावित्यर्थः। तृतीये द्वारकातः श्रीकृष्णस्य प्रस्थानवर्णनम् द्वारकासमुद्रयोर्वर्णनञ्च विस्तारयन् कविः -

चिक्रंसया कृत्रिमपक्त्रिपङ्क्तेः कपोतपालीषु निकेतनानाम्।

मार्जारमप्यायतनिश्चलाङ्गं यस्यां जनः कृत्रिममेव मेने।। इति। **(3.51.**शिशुपालवधम्।**)**

यस्यां पुरि निकेतनानां = वेश्मनाम्। 'वेश्म सद्म निकेतनम्' इत्यमरः। कपोतान्पक्षिणः पालयन्तीति कपोतपाल्यो विटङ्कापरनामानः स्तम्भाग्रप्रसारिता दारुविशेषाः। 'कपोतपालिकायां तु विटङ्कं पुन्नपुंसकम्' इत्यमरः। तासु कृत्रिमपत्रिणां दारुमयपक्षिणां पङ्क्तेः। चिक्रंसया क्रमितुमिच्छया। जिघृक्षयेत्यर्थः। आयतमानतं वा निश्चलमङ्गं यस्य तं मार्जारं बिडालमपि। 'ओतुर्बिडालो मार्जारः' इत्यमरः। जनः कृत्रिमं क्रियया निर्वृत्तमेव मेने। न तु वास्तवमित्यर्थः। 'ड्वितः क्त्रिः' 'त्रेर्मम्नित्यम्' इति मप्प्रत्ययः। अनेन कृत्रिमाकृत्रिमभेदो दुर्ग्रह इति शिल्पज्ञानातिशयोक्तिः। अत्र कविकल्पितसादृश्यान्मार्जारजनयोः कृत्रिमाकृत्रिमेषु विपरीतमतिवर्णनम्। कृत्रिमशब्दः उपरिष्टात् व्युत्पादितः।

ननु सहजेषु प्राकृतिकवस्तुष्वपि भावविकारा भवन्ति। यथा जनिः स्थितिः परिणामः वृद्धिः क्षयः नाशश्च। तत्रापि क्रिया भावविकारिणी चेत्। सत्यम्। किन्तु तासामस्मत्कर्तृकत्वाभावात् कर्तृकर्मादिविवक्षायाः लौकिकव्यवहारसाधनीभूतभाषामात्रावस्थितत्वाच्च न तादृश्याः क्रियाया अत्र परिगणना।

किरातार्जुनीयस्य तृतीयसर्गे अर्जुनस्य द्रौपदीदर्शनप्रसङ्गे पथिकः प्रियतमार्पितं पाथेयमञ्जलौ यथा सहजप्रेम्णा स्वीकरोति तद्वद्द्रौपदीदर्शनम् (नेत्रानन्ददायि) अर्जुनेन स्वीकृतमिति वर्णयन् कविः -

अकृत्रिमप्रेमरसाभिरामं रामार्पितं दृष्टिविलोभि दृष्टम्।

मनः प्रसादाञ्जलिना निकामं जग्राह पाथेयमिवेन्द्रसूनुः।। इति। (**3.37.**किरातार्जुनीयम्।)

इन्द्रसूनुरर्जुनः। क्रियया निर्वृत्तः कृत्रिमः 'ड्वितः क्त्रिः' इति क्त्रिः। 'त्रेर्मम्नित्यम्' इति मप्प्रत्ययः। तद्विरुद्धम्। प्रेमैव रसः। अकृत्रिमेण प्रेमरसेनाभिरामम्। अन्यत्र प्रेमरसेन मधुरादिना चाभिरामम्। रामया रमण्यार्पितम्। दृष्टिं विलोभयतीति दृष्टिविलोभि। दृष्टिप्रियमित्यर्थः। मनः प्रसादः। प्रसन्नं मन इत्यर्थः। सोऽञ्जलिरिवेत्युपमितसमासः। तेन मनः प्रसादाञ्जलिना। पथि साधु पाथेयं शम्बलमिव। निकाममतिशयेन जग्राह। रामार्पितं पाथेयं पथि क्षेमाय भवतीत्यागमः।

कुमारसम्भवस्य प्रथमे सर्गे पार्वत्याः बाल्यक्रीडावर्णनावसरे -

मन्दाकिनीसैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च।

रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाल्ये।। इति। (**1.29.**कुमारसम्भवम्।)

सा बाल्ये क्रीडारसं निर्विशती इव सखीनां मध्यगता (सती) मन्दाकिनीसैकतवेदिकाभिः कन्दुकैः कृत्रिमपुत्रकैश्च पुनः पुना रेमे इति भावः। अत्र कृत्रिमपुत्रकैरित्यस्य पाञ्चालिकाभिः इत्यर्थः। क्रियया निर्वृत्तैः कृत्रिमैः 'ड्वितः क्त्रिः' इति क्त्रिप्रत्ययः। ततः 'त्रेर्मम्नित्यम्' इति मप्। पाञ्चालिका पुत्रिका स्यात् वस्त्रदन्तादिभिः कृता इत्यमरः।

एवं रघुवंशस्य त्रयोदशसर्गे -

सानुप्लवः प्रभुरपि क्षणदाचराणां भेजे रथान्दशरथप्रभवानुशिष्टः।

मायाविकल्परचितैरपि ये तदीयैर्न स्यन्दनैस्तुलितकृत्रिमभक्तिशोभाः।। इति। (**13.75.**रघुवंशम्।)

सानुप्लवः सानुगः। अभिसारस्त्वनुसरः सहायोऽनुप्लवोऽनुगः इति यादवः। क्षणदाचराणां प्रभुर्विभीषणोऽपि। दशरथः प्रभवो यस्य स दशरथप्रभवो रामः। तेनानुशिष्ट आज्ञप्तः सन्।

रथान्भेजे। तानेव विशिनष्टि ये रथा मायाविकल्परचितैः सङ्कल्पविशेषनिर्मितैरपि तदीयैर्बिभीषणैः स्यन्दनै रथैस्तुलितकृत्रिमभक्तिशोभास्तुलिता = समीकृता कृत्रिमा = क्रियया निर्वृत्ता भक्तीनां शोभा येषां ते तथोक्ता न भवन्ति। तेऽपि तत्साम्यं न लभन्त इत्यर्थः। कृत्रिमेत्यत्र 'ड्वितः क्त्रिः' इति क्त्रिप्रत्ययः। ततः 'त्रेर्मम्नित्यम्' इति मप्प्रत्ययश्च।

काव्येषु प्रायशः सर्वेषामपि क्त्रिप्रत्ययान्तशब्दानामुदाहरणानि उपलभ्येरन्। तथापि अनधिगतसर्वकाव्यस्यास्य जनस्य उदाहरणोद्धरणवेलायां त एव कथासन्दर्भाः आवर्त्तेरन्। आवृत्या विरसता भवेत्पाठकेष्विति भिया क्त्रिप्रत्ययान्तशब्दाः अधस्तात्क्रोडीक्रियन्ते।

| क्र.सं. | धातुः | गणसंख्या | रूपम् | अर्थः |
|---|---|---|---|---|
| 1. | 'डुलभष् प्राप्तौ' | (भ्वा.975) | लब्ध्रिमम्। | that which is obtained, acquired, received |
| 2. | 'डुपचष् पाके' | (भ्वा.996) | पक्त्रिमम्। | that which is ripened, matured, cooked |
| 3. | 'डुवप् बीजसन्ताने' | (भ्वा.1003) | उप्त्रिमम्। | that which is sawn |
| 4. | 'डुभृञ् धारणपोषणयोः' | (जुहो.1087) | भृत्रिमम्। | Supported, nourished |
| 5. | 'डुदाञ् दाने' | (जुहो.1091) | दत्रिमम्। | that which is given, gifted |
| 6. | 'डुधाञ् धारणपोषणयोः' | (जुहो.1092) | हित्रिमम्। | that which is retained |
| 7. | 'डुमिञ् प्रक्षेपणे' | (स्वा.1251) | मित्रिमम्। | that which is thrown |
| 8. | 'डुकृञ् करणे' | (तना.1473) | कृत्रिमम्। | Artificial, fictitious |
| 9. | 'डुक्रीञ् द्रव्यविनिमये' | (क्र्या.1474) | क्रीत्रिमम्। | Commodity |

***